शारीरकमीमांसायां पञ्चभूतोत्पत्तिविचारः

Dr. Ajikumar P.V.
Asst. Professor, Government Sanskrit College, Tripunithura

प्रस्थानत्रयान्तर्गतायां शारीरकमीमांसायां नैके विषयाः प्रतिपादिताः सन्ति। तत्र विषयप्रतिपादनेन इदमुद्दिश्यते यत् ब्रह्मणो अद्वितीयत्वसमर्थनम्। जिज्ञास्यब्रह्मणः स्वरूपमपि जगत्कारणत्वेन प्रतिपादितम् –जन्माद्यस्य यतः इति। सर्वस्यापि विकारजातस्य कारणं ब्रह्म। तत्र कारणत्वे उक्ते अपि श्रुतिषु कुत्रचित् सृष्टिवाक्येषु विगानं दृश्यते। तत्र परिहारः शारीरके प्रदर्शितः इति शोधनमस्य लेखस्य लक्ष्यं भवति। लक्ष्यान्तरमप्यस्ति यत् ब्रह्मसत्यत्ववादिषु जगन्मिथ्यात्ववादिषु च श्रुतिषु किमर्थं सृष्टिवाक्यानि प्रोक्तानि इति। अनयोः सन्देहयोः परिहारः वियदाद्युत्पत्तिविचारेण प्रस्तूयत यथाशाङ्करभाष्यम्। समन्वयाविरोधसाधनफलाख्याः चत्वारोऽध्यायाः सन्ति बादरायणाचार्यकृते ब्रह्मसूत्रग्रन्थे। प्रथमेऽध्याये सर्वेषां वेदान्तवाक्यानामद्वितीये ब्रह्मणि तात्पर्यमिति प्रदर्शितम्। सर्वज्ञः ईश्वरः जगतः उत्पत्तिस्थितिलयकारणमिति अर्थः समर्थितः। प्रधानादीनां जगत्कारणत्वमाशङ्क्य परिहृतञ्च। द्वितीयेऽध्याये स्वपक्षे स्मृतिन्यायविरोधपरिहारः, प्रधानादिवादानां न्यायाभासोपबृंहितत्वम्, प्रतिवेदान्तं च सृष्ट्यादिप्रक्रियायाः अविगीतत्वमित्यस्य अर्थजातस्य प्रतिपादनं प्रस्फुटाक्षरैः दत्तम् ।[1] अध्यायस्य अस्य तृतीयपादे पञ्चभूतानामुत्पत्तिविषये श्रुतिविरोधः कथं परिह्रियते इति संक्षेपेण प्रदर्शयितुमत्र प्रयत्यते।

जन्माद्यस्य यतः इति सूत्रे सर्वज्ञं सर्वशक्ति ब्रह्मैव जगतः उत्पत्तिस्थितिलयकारणमिति अर्थः प्रदर्शितः। प्रदर्शितं ब्रह्मणः जगत्कारणत्वं न केवलं निमित्तकारणपरं किन्तु उपदानकारणपरमपि इति प्रकृत्यधिकरणे प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्[2] इत्यादिसूत्रैः प्रतिपादितम्। अथ इदानीं जगत्सृष्टिक्रमे क्रममधिकृत्य श्रुतिषु विगानं दृश्यते। यथा छान्दोग्ये "तत्तेजोऽसृजत"[3] इति तेज आदिका सृष्टिः श्रूयते। तैत्तिरीये च आकाशादिका[4] । अतोऽत्र प्रथमं सन्दिह्यते यदाकाशस्य सृष्टिरस्ति वेति। विचारोऽयं वियदधिकरणे प्रस्तुतः। छान्दोग्ये तेज आदिका सृष्टिः श्रूयते इति आकाशस्य सृष्टिः नास्ति इति न वियदश्रुतेः[5] इति सूत्रेण विरोधिमतं प्रदर्शितम्।

पक्षान्तरप्रतिग्रहप्रदर्शकं भवति 'अस्ति तु '[6] इति सूत्रम्। यद्यपि छान्दोग्ये वियदुत्तिः न श्रूयते तथापि तैत्तिरीये तच्छ्रूयते इति सूत्रतात्पर्यम्। तथा च श्रुतिः – 'तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः' इति। तैत्तिरीये 'सत्यं ज्ञानमन्तं ब्रह्म' इति ब्रह्मणो लक्षणमुक्त्वा तस्मादेव ब्रह्मणः समस्तजगदुत्पत्तिं श्रावयति। तत्रादौ तावत् 'तस्माद्वा एतस्मादात्मनः आकाशः सम्भूत' इति। एवं सति श्रुत्योः छान्दोग्यतैत्तिरीययोः विरोधप्रसङ्गः। तथापि 'आकाशाद्वायुः वायोरग्निः' इति तैत्तिरीयके प्रदर्शितत्वात् विरोधपरिहारः सम्भवति इति।

अत्र पुनः मतान्तरं पूर्वपक्षानुकूलं प्रदर्श्यते 'गौण्यसम्भवात्'[7] इति सूत्रेण। आकाशोत्पत्तिवाचिनी तैत्तिरीयश्रुतिः गौणी भवितुमर्हति। यतः काणादमतानुसारं कारणसामग्र्यसम्भवात् आकाशस्य सृष्टिः न सम्भवति। लोके सर्वत्र समवाय्यसमवायिनि मित्तकारणापेक्षया कार्यमुत्पद्यते। आकाशस्य एकजातीयकमनेकजातीयकं वा द्रव्यं समवायिकारणं न दृश्यते। उत्पत्तिमतां च तेजःप्रभृतीनां पूर्वोत्तरकालयोः विशेषः सम्भावयितुं शक्यते, प्रागुत्पत्तेः प्रकाशादिकार्यं नासीत् पश्चाच्च अभवदिति। आकाशस्य तु तथा न शक्यते। विभुत्वाच्च पृथिव्यादिवैधर्म्याच्चाकाशस्य अजत्वसिद्धिः। तस्मद्यथा घटाकाशादिभेदव्यवहाराणां गौणत्ववत् आकाशोत्पत्तिवाचकश्रुतेरपि गौणत्वं तद्वत् पुनः उत्पत्तिविरोधः प्रदर्श्यते।

न केवलं युक्त्यनुरोधेन आकाशोत्पत्तिं गौणीमकथयत्, किन्तु शब्दादपि। 'शब्दाच्च'[8] इति सूत्रेण तदेव प्रदर्श्यते। 'वायुश्चान्तरिक्षं चैतदमृतम्' इति श्रुतिः अमृतत्वकथनेन आकाशोत्पत्तिं निवारयति। आकाशवत्सर्वगतत्वं नित्यत्वं चात्मनः कल्पयती श्रुतिः आकाशस्यापि सर्वगतत्वनित्यत्वे समर्थयति। तस्मादपि आकाशोत्पत्तिः न सम्भवतीति समर्थ्यते।

अत्रैवमाशङ्क्यते यत् तैत्तिरीये सृष्टिप्रकरणे प्रोक्तानाम् तेजआदिवाचकश्रुतीनाम् मुख्यार्थत्वे सति आकाशवाचकश्रुतेरेव गौणत्वमिति। अतः अत्र उत्तरमुच्यते - स्याच्चैकस्य ब्रह्मशब्दवत्[9] इति सूत्रेण। एकस्य सम्भूतशब्दस्य विषयविशेषणात् गौणो मुख्यश्च प्रयोगो भवितुमर्हति ब्रह्मशब्दवदिति। तथा च यथा 'तपसा ब्रह्म विजिज्ञासस्व' 'तपो ब्रह्म' इत्यत्र प्रयोगे तपसि ब्रह्मविज्ञानसाधने ब्रह्मशब्दः गौण्या प्रयुज्यते विज्ञेये ब्रह्मणि च मुख्यया च। तद्वत् अत्रापि द्रष्टव्यम्। एवं तर्हि एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा न

सम्भवति। नभसः ब्रह्माकार्यत्वे तेन ब्रह्मणः सद्वितीयत्वं सिद्ध्यतीति। तत्र नभसोऽनुत्पत्तिवादिनामिदं समाधानं यत् लक्षणान्यत्वनिमित्तं हि नानात्वमिति। प्रागुत्पत्तेः क्षीरोदकयोरिव संसृष्टयोः नानात्वं लक्षणान्यत्वकृतं नास्ति। ब्रह्माकाशयोः व्यापित्वामूर्त त्वादिधर्मसाधर्म्यात् अनयोः भेदः नास्ति। सर्गकाले ब्रह्म जगदुत्पादयितुं यतते इतरच्चाकाशं स्तिमितमवतिष्ठते इति। 'आकाशशरीरं ब्रह्म' इत्यादिश्रुतिभ्यश्च अनयोरभेदः सिद्ध्यति। तथा च उत्पद्यमानं सर्वमपि कार्यम् आकाशाव्यतिरिक्तमेव उत्पद्यते। अतः ब्रह्मणो आकाशोत्पत्तिश्रुतिः गौणी इति पूर्वपक्षः। अत्रैवं विभज्य ज्ञेयमस्ति – 'न वियदश्रुतेः' इति प्रथमसूत्रं पूर्वपक्षप्रतिपादकमेव। 'अस्ति तु' इति सूत्रेण तैत्तिरीयश्रुतिद्वारा आकाशोत्पत्तिं प्रदर्श्य पक्षान्तरप्रदर्शनेन श्रुतिविरोधः प्रस्तुतः। तृतीयादारभ्य पञ्चमं यावत् प्रदर्शितानि सूत्राणि आकाशोत्पत्तिवाचकश्रुतेः गौणतां प्रदर्शयन्ति।

एवं श्रुत्योः विरोधे प्रदर्शिते तत्परिहाराय आकाशोत्पत्तिसमर्थकं सूत्रमुच्यते – 'प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः'[10] इति। एकविज्ञानेन सर्वविज्ञानमति या सर्ववेदान्तेषु प्रतिज्ञा दृश्यते तस्याः प्रतिज्ञायाः अहानिः –अनुपरोधः भवेत् यदि समस्तस्य वस्तुजातस्य साकाशस्य अव्यतिरेकः विज्ञेयाद् कारणाद् ब्रह्मणः स्यात् । तदर्थं च साकाशस्य वस्तुजातस्य उत्पत्तिः एकस्मात् ब्रह्मणः स्वीकर्तव्या। श्रुतिरपि कार्यकारणाव्यतिरिक्तेणैव प्रतिज्ञासिद्धिं प्रदर्शयति। यद्यपि तैत्तिरीयकछान्दोग्यश्रुत्योः विरोधः प्रतीतः तथापि सर्वश्रुतीनामेकवाक्यतया विरोधपरिहारः सम्भवति। प्रतीते अपि विरोधे, तैत्तिरीये तेजस्सर्गस्य तृतीयत्वश्रवणेन विरोधपरिहारः सम्भवति। एक एव स्रष्टा क्रमेणानैकं स्रष्टव्यं सृजेत्। इमां श्रुतिमन्यथाकल्पयितुं न शक्यते आकाशसृष्टिः नाभवदितिरूपेण। छान्दोग्यश्रुतिं तु अन्यथाकल्पयितुं शक्यते। इयं श्रुतिः तेजस्सृष्टिप्रधाना सती अपि आकाशसृष्टिवारणे न समर्था। तथा चास्यां श्रुतौ 'सर्वं खल्विदं ब्रह्म तज्जलान्' इति सर्वेषां ब्रह्मजत्वमुक्त्वा अन्यत्र तेजआदिक्रमेण उत्पत्तिं न वारयति, तद्वत् प्रदर्शितं तेजसः ब्रह्मजत्वं श्रुत्यन्तरविहिताम् आकाशसृष्टिं न निवारयेत् च । प्रदर्शितेन क्षीरोदकदृष्टान्तेन, एकविज्ञानेन सर्वविज्ञानप्रतिपत्तिः न सम्भवति। श्रुतौ प्रकृतिविकृतिदृष्टान्तेनैव तत्प्रदर्शितम्। अतः गगनोत्पत्तिः छान्दोग्येन न वार्यते इति सिद्धान्तः।

अथ गगनोत्पत्तेःगौणतोक्ता परिहियते 'यावद्विकारं तु विभागो लोकवत्' [11]इति

सूत्रेण। लोके यावद्विकारजातं दृश्यते तावान् विभागो अस्त्येव। अविकृतं सत् विभक्तं कुत्रापि नोपलभ्यते। विभागश्च आकाशस्य पृथिव्यादिभ्यो उपलभ्यते। तस्मादाकाशस्य विकारत्वं सिद्धम्। आत्मनः आकाशादिभ्यो विभक्तत्वे अपि तस्य विकारत्वं नास्ति। आत्मा स्वयंसिद्ध इति तस्यागन्तुकत्वाभावः, आकाशादयस्तु न तथा। आगन्तुकमेव निराक्रियते, न तु स्वरूपम्, निराकर्तुरेव स्वरूपत्वात्। अथ यदुक्तं पूर्वपक्षिभिः समानजातीयकद्रव्याभावात् नाकाशस्योत्पत्तिरिति तत्र समाधानमेवमुच्यते भाष्यकारैः –समानजातीयैरेव आरब्धव्यं कार्यमिति नास्ति नियमः, तन्तूनां तत्संयोगानां द्रव्यगुणत्वेन भिन्नजातीयकत्वात्। समवायिकारणविषये एव तुल्यजातीयत्वमिति उच्येत तथापि रज्जूत्पत्तिविषये सूत्रगोबालादीनाम् अनेकजातीयानाम् अपेक्षा अस्ति। सत्त्वद्रव्यत्वाद्यपेक्षया अपि समानजातीयकत्कल्पना नोचिता, सर्वस्यापि सर्वेण समानजातीयकत्वात्। अनेकमेवारभते नैकमिति नियमो नास्ति। अणुमनसोः आद्यकर्मारम्भकत्वाभ्युगमात्। एकैकः अणुः मनश्चाद्यं कर्मारभते न द्रव्यान्तरैः संहृत्योत्पद्यते। अतः श्रुतिप्रामाण्यादेकस्माद् ब्रह्मणः आकाशादिक्रमेण जगदुत्पत्तिः इति उचिता। यथा अस्थूलमनणु इत्यादिश्रुतेः प्रागुत्पत्तेः पृथिव्याद्यभावः तथा नासीद्रजो नो व्योम इति श्रुतेः आकाशस्यापि अभावो गम्यते। आकाशस्य अभावे सिद्धे कथमाकाशसमत्वं ब्रह्मणः इति चेत् विभुत्वादिभिः धर्मैः आकाशसमत्वमुच्यते इति समाधानम्। ज्यायानाकाशात् इत्यादिवाक्यैः आकाशभिन्नत्वमपि ब्रह्मणः गम्यते। तस्माद् श्रुतिप्रामाण्येन आकाशस्य सृष्टिरस्तीति निर्णीयते।

एवमाकाशविषयकश्रुतिविरोधे परिहृते वाय्वादिविषयकश्रुतिविरोधमपि आशङ्क्य परिहियते अनन्तराधिकरणेषु। तत्र प्रथमं मातरिश्वाधिकरणेन वायूत्पत्तिविषयकविचारो प्रस्तूयते। एतेन मातरिश्वा व्याख्यातः[12] इति एकमेव सूत्रमत्रास्ति। एतेन वियदुत्पत्तिसमर्थनेन वायोरपि उत्पत्तिः समर्थिता इति अतिदिश्यते। तथा च छान्दोग्ये वायोरुपत्त्यश्रवणात् तैत्तिरीयके श्रवणाच्च विरोधः। सैषा अनस्तमिता देवता यद्वायुः इति वायोः अनस्तमितत्वश्रवणात् च वायोः उत्पत्त्यसम्भवः। प्रतिज्ञानुपरोधात् वायोरुपत्तिः इति सिद्धान्तः। अपरविद्याविषयकः एव अस्तमयप्रतिषेधः। यद्यपि वियदधिकरणेन गतार्थोऽयं विषयः तथापि शास्त्रेषु मन्दधियां बोधनाय पृथगुपादनमिति भाष्यकृन्मतम्।

तेजोविषयकोत्पत्तिं प्रतिपादयति तेजोऽधिकरणम्। यद्यपि छान्दोग्यतैत्तिरीययोः तेजसः उत्पत्तिः श्रूयते तथापि कारणविषये विगानं दृश्यते यथा छान्दोग्ये तेजः सन्मूलं दृश्यते, इतरत्र च वायुमूलञ्च। तथा च विरोधः। तत्र सूत्रमिदं यत् 'तेजोऽतस्तथाह्याह '[13] इति। तेजः अतः मातरिश्वनः- वायोः जायते। वायोरग्निः इति स्पष्टमुक्तत्वात्। छान्दोग्यश्रुतेः पारम्पर्यजत्वकल्पने अविरोधात्। आकाशं वायुं च सृष्ट्वा वायुभावापन्नं ब्रह्म तेजोऽसो जायते इति कल्पनेन तेजसः ब्रह्मजत्वं न विरुध्यते। अक्रमेण सृष्टिं वदन्त्यः श्रुतयः एवं व्याख्येयाः इति भाष्यकारस्य तात्पर्यम्। अथ क्रमवादिनीनाम् अन्यथाकल्पनं न शक्यते च। छान्दोग्यगता प्रतिज्ञा अपि भूतानां सदंशत्वविषयिका न तु क्रमविषयिका इति विरोधाभावश्च।

अब्विषयकविगानपरिहारार्थम् अबधिकरणं प्रवर्तते। 'तदपोऽसृजत' 'अग्नेरापः' इत्यनयोः विरोधोऽपि तेजोऽधिकरणन्यायेन परिहर्तव्यमिति प्रदर्शयति 'आपः'[14] इति सूत्रम्। पूर्वसूत्रात् अतस्तथानुगमात् इति अनुवर्तते।

अथ पृथिवीविषयकश्रुत्यर्थस्वष्टीकरणाय उत्तरमधिकरणम् – पृथिव्यधिकरणं प्रवर्तते। छान्दोग्ये 'ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहीति ता अन्नमसृन्त' इति वाक्ये यदन्नं श्रूयते तत्किं पृथिवीवाचकम् आहोस्वित् व्रीहियवाद्यन्नवाचकमिति सन्देहः। प्रसिद्धिहेतोः वर्षणेन च व्रीह्यादीनामेव वर्धनाच्च तदेव व्रीहियवादिकमन्नवाच्यमिति पूर्वपक्षे समाधानमुच्यते – पृथिव्यधिकाररूपशब्दान्तरेभ्यः[15] इति सूत्रम्। पृथिव्येव अत्र अन्नशब्दवाच्यम्, नेतरत्। अधिकाररूपात् शब्दान्तरेभ्यश्च इति अत्र हेतुः। तत्तेजोऽसृजत, तदापोऽसृजत इति महाभूतविषयमेव प्रकरणप्यवृत्तिः। 'यत्कृष्णं तदन्नस्य' इति वाक्यशेषो अपि पृथिवीविषयके युज्यते। व्रीह्यादीनां ओदनादेः वा न कृष्णत्वव्यवहारः नास्ति। पृथिव्यां तु इतररूपापेक्षया बाहुल्येन कृष्णवर्णं दृश्यते इति तत्र कृष्णशब्दप्रयोगे नानुपपत्तिः। समानप्रकरणे बृहदारण्यके 'तद्यदपां शर आसीत् तत्समहन्यत सा पृथिव्यभवत्' इति पृथिवीशब्दप्रयोगेन अब्जन्यत्वं तस्याः समर्थयति। यद्यपि अन्नशब्दस्य व्रीह्यादिषु अस्ति प्रसिद्धिः तथापि अधिकारादिहेतुभिः सा निवर्तते। अतः पृथिव्येव अन्नशब्दवाच्यम्।

एवं पञ्चभूतानाम् उत्पत्तिविषये क्रमविषये च आशङ्किताः श्रुतिविरोधाः शाङ्करभाष्यदिशा परिहृताः। तथा च श्रुतीनां सृष्टिविषये अविगीतत्वं समर्थितम्। अत्र

इयमाशङ्का स्यात् यत्किमर्थमुपनिषत्सु सृष्टिः प्रतिपादिता इति। यतः अद्वैतिनाम्मते ब्रह्मैकमेव स्यं ननु। एकस्यैव ब्रह्मणः सत्यत्वे किमर्थं नानात्वप्रतिपादिकानि सृष्टिप्रतिपादकवाक्यानि सन्देहोत्पादकानि इति। अत्र भाष्याकार एवमभिप्रैतित् वस्तुतस्तु श्रुतीनां सृष्टिप्रतिपादने नास्ति सामर्थ्यम् इति। किन्तु, यदि वियादादिप्रपञ्चस्य सृष्टिः ब्रह्मणो नोच्येत तर्हि सः कारणान्तरादुत्पन्न इति ब्रह्मणो अद्वितीयत्वे विरोधः स्यात्। अर्थात् ब्रह्मणो अन्यस्मात्कारणआत् जगदुत्पन्नम् इति आशङ्क्येत। तथा च ब्रह्मणः अद्वितीयत्वं विरुध्येत। तत्परिहाराय ब्रह्मणः जगदुत्पत्तिः श्राव्यते। जगतः सत्यत्वप्रतिपादनं न श्रुत्यभिमतम्। नेह नानास्ति किञ्चनेत्यादिवाक्यैः तन्मिथ्यात्वमेव प्रतिपादितम्। जगत्कारणम् ब्रह्मेत्यभिप्रेत्य कार्यकारणयोरभेदमुक्त्वा ब्रह्मणो अद्वितीयत्वं पारमार्थिकत्वञ्च समर्थ्यते श्रुतिभिः इति ज्ञेयम् इति तात्पर्यम्।

ग्रन्थसूचिः

1. ब्रह्मसूत्रशाङ्करभाष्यम् रत्नप्रभा-भामती-न्यायनिर्णयोपेतम्, पुटसङ्ख्या 345, सम्पादकः स्वर्गीयः महादेवशास्त्री बाकरे, निर्णयसागरुद्रणालयः मुम्बाई, क्रिस्त्वब्दः 1934.

2. ब्रह्मसूत्रशाङ्करभाष्यम् – 1-4-7-23, रत्नप्रभा-भामती-न्यायनिर्णयोपेतम्, पुटसङ्ख्या 337, सम्पादकः स्वर्गीयः महादेवशास्त्री बाकरे, निर्णयसागरुद्रणालयः मुम्बाई, क्रिस्त्वब्दः1934

3. छान्दोग्योपनिषत् शाङ्करभाष्यम् आनन्दगिरीटीकोपेतम्, सम्पादकः विनायकगणेश आपटे आनन्दाश्रमम्द्रणालये मुद्रितः क्रिस्त्वब्दः 1934.6-2-3 पुटसङ्ख्या 330

4. तैत्तिरीयोपनिषत् शाङ्करभाष्यम् शङ्करान्दविद्यारण्यकृतदीपिकाद्व योपेतम्, सम्पादकः महादेव चिमाणजी आपते आनन्दाश्रममुद्रणालये मुद्रितम् शकाव्दः1811 पुटसङ्ख्या 48

5. ब्र.सू. शा.भा.2-3-1-1 पुटसङ्ख्या 498

6. तत्रैव 2-3-1-2 पुटसङ्ख्या 499

7. तत्रैव 2-3-1-3 पुटसङ्ख्या 500
8. ब्र.सू.शा.भा. 2-3-1-4 पुटसङ्ख्या 501
9. तत्रैव 2-3-1-5 पुटसङ्ख्या 502
10. ब्र.सू.शा.भा.2-3-1-6 पुटसङ्ख्या 503
11. तत्रैव 2-3-1-7 पुटसङ्ख्या 507
12. ब्र.सू.शा.भा. 2-3-2-8 पुटसङ्ख्या 512
13. ब्र.सू.शा.भा. 2-3-4-10 पुटसङ्ख्या 514
14. तत्रैव 2-3-5-11 पुटसङ्ख्या 517
15. तत्रैव 2-3-6-12 पुटसङ्ख्या 517